क्रियोत्पादनद्वारेणास्ति रजसः कारणत्वमिति न व्यर्थं रज” इतित०कौ०। तिज निशाने इत्यस्मादसुन् तेन तेजसा कृतः तैजसः रजसस्य सत्वतमसोः स्वस्वतेजकार्य्यसमर्थत्वकरणरूपतैक्ष्ण्यकरणगुणयोगात् तेजःपदाभिधेयता इति तदाशयः “तैजसादिन्द्रियाण्याहुः” शा०ति०। सत्त्वगुणस्य प्रकाशकत्वात् “तैजसमन्तःकरणमिति” वेदान्तप०। ४तीर्थभेदे न०। “तैजसं नाम तत्तीर्थं यत्र तीर्थह्यपां पतिः। अभिषिक्तः सुरगणैर्वरुणो भरतर्षभ!” भा०श०४७ अ०। एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति। तेजोमयान्तःकरणोपहितत्वात्” वेदान्तसारोक्ते ५चैतन्यभेदे पु०।

**तैजसावर्त्तनी** स्त्री तैजसं धातुद्रव्यमावर्त्यतेऽत्र आ+वृत णिच्—आधारे ल्युट् ङीप्। मूषायाम्। (मुची) अमरः

**तैतल** पु० ऋषिभेदे ततः तिका० अपत्ये फिञ्। तैतलायनि तदपत्ये पुंस्त्री।

**तैतिक्ष** त्रि०तितिक्षा शीलमस्य छत्रादि० ण। तितिक्षाशीले।

**तैतिक्ष्य** पुंस्त्री० तितिक्षस्य ऋषिभेदस्य गोत्रापत्यं गर्गा० यञ्। तितिक्षर्षिगोत्रापत्ये तस्य छात्राः कण्वा० अण् यञो लोपः। तैतिक्षाः तैतिक्ष्यस्य छात्रेषु ब०व०।

**तैतिर** पुंस्त्री० तैत्तिर पृषो०। (तितिर) खगे राजनि०। स्त्रियां ङीष्।

**तैतिल** पु० १गण्डकपशौ। २ववादितश्चतुर्थे करणे न० मेदि०। ३देवे च। “शक्तिसदृशेन दानेनावाधितधरणीतलतैतिलगणः” दशकु०। तैतिलशब्दस्य कद्रूशब्देन समासे पूर्वपदप्रकृतिस्वरः।

**तैतिलिन्** पु० गोत्रप्रवर्त्तकर्षिगणस्थप्रवरभेदे।

**तैत्तिर** न० तित्तिरीणां समूहः अण्। तित्तिरखगसमूहे। तित्तिर+स्वार्थे अण्। (तितिर) खगभेदे पुंस्त्री राजनि०। गण्डकपशौ च मेदि०।

**तैत्तिरि** पु० कुकुरवंश्यन्टपभेदे। “कुकुरस्य सुतो धृष्णुर्धृष्णोऽस्तु तनयस्तथा। “कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत्”। हरिवं० ३८अ०। २ऋषिभेदे। “आद्यः कठस्तैत्तिरिश्च वैशम्पायनपूर्वजः” भा० शा० ३३८ अ०। ३कृष्णयजुःप्रवर्त्तके ऋषिभेदे।

**तैत्तिरीय** पु०ब०व०तित्तिरिणा प्रोक्तमधीयते छण्। १तित्तिरिप्रोक्तशाखाध्येतृषु स्वार्थे क। तैत्तिरीयकास्तत्रार्थे। यजुःशाखाभेदे। तन्नामनिरुक्तिः यथा।
“देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम्। ततो गतोऽथ मुनयोददृशुस्तान् यजुर्गणान्। यजूंषि तित्तिराभूत्वा तल्लोलुपतया ददुः। तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः” भाग० १२।

**तैन्तिडीक** त्रि० तिन्तीड़िकेन संस्कृतम् कोपधत्वात् अण्। तिन्तिड़ीकसंस्कृतव्यञ्जनादौ। तस्य विकारः कोपधत्वात् अण्। २तिन्तिड़ीकविकारे च।

**तैमिर** तिमिरमेव अण्। नेत्ररोगभेदे “ऐमं हन्यात्मनःकाम्यकाचान् नीलीरोगं तैमिराञ्जनेन” सुश्रु०। तैमिरो रोगोऽस्त्यस्य ठन् तैमिरिकः। तिमिररोगयुक्ते। “न वामयेत्तैमिरिकोर्द्ध्ववातगुल्मोदरप्लीहकृमिश्रमार्त्तान्” सुश्रु०। “तैमिरिका दूराद्दूरदर्शिनम्” काद०।

**तैर** न० तीरे भवः अण्। कूलत्थे राजनि०।

**तैरणी** स्त्री तीरे नमति नम—बा०ड ततः स्वार्थे अण् गौरा० ङीष्। कुनील्यां रागदे क्षुपभेदे। [तिर्यग्जातिसम्बन्धिनि

**तैरश्च** त्रि०तिरश्चामिदम् तिर्य्यच् अण्+भत्वात् तिरश्चादेशः।

**तैर्थ** त्रि० तीर्थे दीयते कार्य्यं वा व्युष्टा० अण्। १तीर्थे देये २तीर्थकार्य्ये च तीर्थात् आयस्थानादागतः शुण्डिका० अण्। तीर्थरूपायस्थानादागते द्रव्यादौ च।

**तैर्थक** त्रि० तीर्थे देशे भवः धूमा० वुञ्। तीर्थदेशभवे।

**तैर्थिक** त्रि० तीर्थं सिद्धान्तनिश्चयं नित्यमर्हति छेदा० ठञ्। १तीर्थसिद्धान्ताभिज्ञे शास्त्रकरे कपिलकणादादौ तीर्थं वेत्ति ठञ् वा। २सिद्धाभिज्ञे। तीर्थे भवः ठञ्। ३तीर्थभवे। “तैर्थिकाभुञ्जते यस्तु मणिनागस्य” भा०व०८५ स्लो०।

**तैर्थ्य** त्रि० तीर्थ+चतुरर्थ्यां० सङ्का० ण्य। तीर्थसमीपादौ।

**तैर्य्यगयनिक** त्रि० तिरश्चामयनं सत्रभेदः तदेव ठञ्। सत्रभेदे। “अष्टादशभिर्ज्यायानादित्यः संवत्सर एव तैर्यगयनिको भवति। आदित्यः खलु शश्वदेकदा षण्मासानुदङ्ङेति नव चाहानि तथा दक्षिणा” श्रुतिः।

**तैर्य्यग्योन** त्रि० तिर्य्यग्योनेरिदम्+अण्। तिर्य्यग्योनीनां पश्वादीनां सम्बन्धिनि सर्गभेदे।
“अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति। मानुष्यश्चैकविधः समासतो भौतिकः सर्गः” सा० का० तैर्य्यग्योनश्च पञ्चधा भवति पशुमृगपक्षिसरीसृपस्थावरात्मकः” त० कौ०। तत्र भवः अण्। तद्योनिभवे। “निन्दन्त्यवमतास्तत्रं तैर्य्यग्योनास्तथैव च” मनुः।

**तैल** न०तिलस्य तत्सदृशस्य वा विकारः अञ्। तिलसर्षपादिजनिते स्नेहद्रव्यभेदे। तल्लक्षणादिकं भावप्र० उक्तं यथा “तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम्। तत्तु वातहरं सर्वं विशेषात्तिलसम्भवम्। अथ तिलतैलगुणाः